नं० १०८७-घ

सनत्कुमारसंहितायां

श्रीरामस्तवराजः (पुराणम्)

पत्राणि ७ (सम्पूर्णम्)

नं० १०८७-घ

७ पत्रे

लि० संवत् १८६२

[illegible]

रामस्त
१

ॐ श्रीरामचंद्राय नमो नमः ॥ ॐ अस्य श्रीरामचंद्रस्तवराजस्तोत्रमंत्रस्य सनत्कुमार ऋषि
रनुष्टुप् छंदः ॥ श्रीरामो देवता सीता बीजं हनुमान् शक्तिः ॥ श्रीरामप्रीत्यर्थे जपे वि
नियोगः ॥ श्रीसूत उवाच ॥ सर्वशास्त्रार्थतत्त्वज्ञं व्यासं सत्यवतीसुतं ॥ धर्मपुत्रः प्रहृ
ष्टात्मा प्रत्युवाच मुनीश्वरम् २ ॥ युधिष्ठिर उवाच ॥ भगवन् योगिनां श्रेष्ठ सर्वशा
स्त्रविशारद ॥ किं तत्त्वं किं परं जाप्यं किं ध्यानं मुक्तिसाधनम् ॥ ३ ॥ श्रोतुमिच्छामि
तत्सर्वं ब्रूहि मे मुनिसत्तम ॥ श्रीव्यास उवाच ॥ धर्मपुत्र महाभाग शृणु वक्ष्यामि
तत्त्वतः ॥ ४ ॥ यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवं ॥ तदेव परमं तत्त्वं कैवल्यपद
कारणं ॥ ५ ॥ श्रीरामेति परं जाप्यं तारकं ब्रह्मसंज्ञकं ॥ ब्रह्महत्यादिपापघ्नमिति
वेदविदो विदुः ॥ ६ ॥ श्रीराम रामेति जना ये जपंति च नित्यदा ॥ तेषां भुक्तिश्च मुक्ति
श्च भविष्यति न संशयः ॥ ७ ॥ स्तवराजं पुरा प्रोक्तं नारदेन च धीमता ॥ तत्सर्वं सं

प्रवक्ष्यामिहरिध्यानपूर्वकंस्मरणम् ||८|| तापत्रयाग्निशमनेसर्वाघौघनिकृंतनं || दारिद्रदुःख
शमनेसर्वसंपत्करंशिवम् ||९|| विज्ञानफलदेदिव्यमोक्षैकफलसाधने || नमस्कृत्यप्रव
क्ष्यामिरामंकृष्णंजगन्मयं ||१०|| अयोध्यानगरेरम्येरत्नमंडपमध्यगे || स्मरेत्कल्पतरोर्मूले
रत्नसिंहासनेशुभम् ||११|| तन्मध्येष्टदलोपेतनानारत्नैश्चवेष्टिते || स्मरेन्मध्येदाशरथिं
सहस्रादित्यतेजसं ||१२|| पितुरंकगतंराममिंद्रनीलमणिप्रभं || कोमलांगंविशालाक्षं
विद्युद्वर्णांबरावृतं || भानुकोटिप्रतीकाशकिरीटेनविराजितं || रत्नग्रैवेयकेयूररत्न
कुंडलमंडितं ||१३|| रत्नकंकणमंजीरकटिसूत्रैरलंकृतं || श्रीवत्सकौस्तुभोरस्कंमुक्ता
हारोपशोभितं ||१४|| दिव्यरत्नसमायुक्तंमुद्रिकाभिरलंकृतं || राघवंद्विभुजंबाल
राममीषत्स्मितानने ||१५|| तुलसीकुंदमंदारपुष्पमाल्यैरलंकृतं || कर्पूरागुरुकस्तूरी
दिव्यगंधानुलेपने ||१६|| योगशास्त्रेष्वभिरतंयोगेशंयोगदायकं || सदाभरतसौमित्रि

२
राम.

शत्रुघ्नैर्हृदयस्थोऽस्मि नम्रम् ॥१८॥ विद्याधरसुराधीशैः सिद्धगंधर्वकिंनरैः ॥ योगीन्द्रैर्नारदाद्यै
श्च स्तूयमानमहर्निशं ॥१९॥ विश्वामित्रवशिष्ठादिमुनिभिः परिसेवितं ॥ सनकादिमु
निश्रेष्ठैर्योगिवृंदैश्च सेवितं ॥२०॥ रामं रघुवरं वीरं धनुर्वेदविशारदं ॥ मंगलायतनं
देवं रामं राजीवलोचनम् ॥२१॥ सर्वशास्त्रार्थतत्वज्ञमानंदकरसुंदरं ॥ कौशल्यानं
दनं रामं धनुर्बाणधरं हरिं ॥२२॥ एवं संचिंतयन्विष्णुं यज्ज्योतिरमलं विभुं ॥ प्रहृष्टमा
नसो भूत्वा मुनिवर्य्यः स नारदः ॥२३॥ सर्वलोकहितार्थाय तुष्टाव रघुनंदनं ॥ कृ
तांजलिपुटो भूत्वा चिंतयन्नद्भुतं हरिं ॥२४॥ यदेकं यत्परं नित्यं यदनंतं चिदात्मकं
म् यदेकं व्यापकं लोके तद्रूपं चिंतयाम्यहम् ॥२५॥ विज्ञानहेतुं विमलायताक्षं
प्रज्ञानरूपं स्वसुखैकहेतुं ॥ श्रीरामचंद्रं हरिमादिदेवं परात्परं राममहं भजामि
२६॥ कविं पुराणं पुरुषं पुरस्तात्सनातनं योगिनमीशितारं ॥ अणोरणीयांसमनंत

वीर्यं प्राणेश्वरे राममसमोहदर्शी ॥ २७ ॥ श्रीनारद उवाच ॥ नारायणो जगन्नाथमभिरामे जगत्पति ॥ वा विष्णुर्वाणेवागीशे राममे दशरथात्मजम् ॥ २८ ॥ राजराजे रघुवरं कौशल्यानंदवर्द्धनम् ॥ भर्गवरेण्यविश्वेशे रघुनाथं जगद्गुरुम् ॥ २९ ॥ सत्यं सत्यप्रिये श्रेष्ठे जानकीवल्लभे विभुम् ॥ सौमित्रिपूर्वजे शांते कामदं कमलेक्षणम् ॥ ३० ॥ आदित्यरविमीशाने घृणिः सूर्यमनामये ॥ आनंदरूपिणी सौम्ये राघवं करुणामये ॥ ३१ ॥ जामदग्न्ये तपोमूर्तिरामं परशुधारिणं ॥ वाक्पतिं वरदे वाच्ये श्रीपतिं पक्षिवाहने ॥ ३२ ॥ श्रीशार्ङ्गधारिणे रामं चिन्मयानंदविग्रहं ॥ हलधृग्विष्णुमीशाने बलरामं कृपानिधिं ॥ ३३ ॥ श्रीवल्लभे कृपानाथं जगन्मोहनमच्युतम् ॥ मत्स्यकूर्मवराहादिरूपधारिणमव्यये ॥ ३४ ॥ वासुदेवं जगद्योनिमनादिनिधनं हरिं ॥ गोविंदं गोपतिं विष्णुं गोपीजनमनोहरम् ॥ ३५ ॥ गोपालं गोपसंवारे गोपकन्यासमावृतम् विद्युत्पुंजप्रतीकाशं रामं कृष्णं जगन्मयम् ॥ ३६ ॥ गोगोपिकासमा

राम॰
२
३

वीणां वेणुवादनतत्परं ॥ कामरूपं कलावंतं कामिनीकामदं विभुं ॥ ३७ ॥ मन्मथं मथुरानाथं माधवं म
करध्वजं ॥ श्रीधरं श्रीकरं श्रीशं श्रीनिवासं परात्परम् ॥ ३८ ॥ भूतेशं भूपतिं भद्रं विभूतिं भूतिभूष
णं ॥ सर्वदुःखहरं वीरं दुष्टदानववैरिणम् ॥ ३९ ॥ श्रीनृसिंहं महाबाहुं महांतं दीप्ततेजसम् ।
चिदानंदमयं नित्यं प्रणवं ज्योतिरूपिणम् ॥ ४० ॥ आदित्यमंडलगतं निश्चितार्थस्वरूपिणं ॥ भ
क्तप्रियं पद्मनेत्रं भक्तानामीप्सितप्रदं ॥ ४१ ॥ कौशल्येयं कलामूर्तिं काकुत्स्थं कमलाप्रियं ॥ सिं
हासने समासीनं नित्यव्रतमकल्मषं ॥ ४२ ॥ विश्वामित्रप्रियं दांतं स्वदारनियतव्रतं ॥ यज्ञेशं
यज्ञपुरुषं यज्ञपालनतत्परम् ॥ ४३ ॥ सत्यसंधं जितक्रोधं शरणागतवत्सलं ॥ सर्वक्लेशाप
हरणं विभीषणवरप्रदं ॥ ४४ ॥ दशग्रीवहरं रौद्रं केशवं केशिमर्दनं ॥ वालिप्रमथनं वीरं सुग्री
वेप्सितराज्यदं ॥ ४५ ॥ नरवानरदेवैश्च सेवितं हनुमत्प्रियम् ॥ शुद्धं सूक्ष्मं परं शांतं तारकं ब्रह्म
रूपिणम् ॥ ४६ सर्वभूतात्मभूतस्थं सर्वाधारं सनातनं ॥ सर्वकारणकर्तारं निदानं प्रकृतेः परं

४७ निरामये निराभासे निर्विकल्पे निरंजने नित्यानंदे निराकारमद्वैते तमसः परे ४८
परात्परतरे तत्वे सत्यानंदे चिदात्मके । मनसा वचसा नित्यं प्रणमामि रघूत्तमं ॥४९॥ सू
र्यमंडलमध्यस्थं रामं सीतासमन्वितं ॥ नमामि पुंडरीकाक्षममेयं गुरुतत्परं ॥५०॥ नमो
स्तु वासुदेवाय ज्योतिषां पतये नमः ॥ नमोस्तु रामदेवाय जगदानंदरूपिणे ॥५१॥ न
मो वेदांतवेद्याय योगिने ब्रह्मवादिने ॥ मायामयनिरस्ताय प्रपन्नजनसेविने ॥५२॥
वंदामहे महेशानचंडकोदंडखंडनं ॥ जानकीहृदयानंदचंदनं रघुनंदनं ॥५३॥ उत्
फुल्लामलकोमलोत्पलदलश्यामाय रामाय ते ॥ कामाय प्रमदामनोहर
गुणग्रामाय रामात्मने ॥ योगारूढमुनींद्रमानससरोहंसाय संसारविध्वंसाय
स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥५४॥ भवोद्भवं वेदविदां वरिष्ठमादित्य
चंद्रानलसुप्रभावं ॥ सर्वात्मकं सर्वगतस्वरूपं नमामि रामं तमसः परस्तात्

निरंजनं निःप्रतिमं निरीहं निराश्रयं निष्कलमप्रपंचं ॥ नित्यं ध्रुवं निर्विषयस्व-
रूपं निरंतरं राममहं भजामि ॥५६॥ भवाब्धिपोतं भरताग्रजं तं भक्तिप्रियं
भानुकुलप्रदीपं भूतत्रिनाथं भुवनाधिपत्यं भजामि रामं भवरोगवैद्यं ॥५७॥ स
र्वाधिपत्यं समरंगधीरं सत्यं चिदानंदमयस्वरूपं ॥ सत्यं शिवं शांतिमयं शरण्यं स
नातनं राममहं भजामि ॥५८॥ कार्यं क्रियाकारणमप्रमेयं कविं पुराणं कमला
यताक्षं ॥ कुमारवेद्यं करुणामयं तं कल्पद्रुमं राममहं भजामि ॥५९॥ त्रैलोक्यना-
थं सरसीरुहाक्षं दयानिधिं द्वंद्वविनाशहेतुं ॥ महाबलं वेदनिधिं सुरेशं सनातन
नं राममहं भजामि ॥६०॥ वेदांतवेद्यं कविमीशितारमनादिमध्यांतमचिंत्यमा-
द्यम् ॥ अगोचरं निर्मलमेकरूपं नमामि रामं तमसः परस्तात् ॥६१॥ अशे-
षवेदात्मकमादिसंज्ञमजं हरिं विष्णुमनंतमूर्तिं ॥ अपारसंवित्सुखमेकरूपं परा

त्वं राममहं भजामि ॥ ६२ ॥ नत्वं स्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकं ॥ राजा-
धिराजं रविमंडलस्थं विश्वेश्वरं राममहं भजामि ॥ ६३ लोकाभिरामं रघुवंशनाथं
हरिं चिदानंदमयं मुकुंदं ॥ अशेषविद्याधिपतिं कवींद्रं नमामि रामं तमसः परस्ता-
त् ॥ ६४ ॥ योगींद्रसंघैश्च सुसेव्यमानं नारायणं निर्मलमादिदेवं ॥ नतोस्मि नित्यं जगदेक
कनाथमादित्यवर्णं तमसः परस्तात् ॥ ६५ ॥ विभूतिदं विश्वसृजं विराजं राजेंद्रमीशं
रघुवंशनाथं ॥ अचिंत्यमव्यक्तमनंतमूर्तिं ज्योतिर्मयं राममहं भजामि ॥ ६६ ॥ अशे-
षसंसारविकारहीनमादित्यसंपूर्णसुखाभिरामं ॥ समस्तसाक्षीं तमसः परस्तान्ना-
रायणं विष्णुमहं भजामि ॥ ६७ ॥ मुनींद्रगुह्यं परिपूर्णमेकं कलानिधिं कल्मषना-
सहेतुं परात्परं सत्यमं पवित्रं नमामि रामं महतो महांतं ॥ ६८ ॥ ब्रह्माविष्णुश्च रु-
द्रश्चेंद्रो देवतास्तथा ॥ आदित्यादिग्रहाश्चैव त्वमेव रघुनंदन ॥ तापसाऋ

र

रामस्त
५
२
5

यक्षाः सिद्धाः साध्याश्च नरास्तथा ॥ विप्रा वेदास्तथा यज्ञाः पुराणं धर्मसंहिता ॥ १० ॥ वर्णा
श्रमास्तथा यथा धर्मो वर्णधर्मास्तथैव च ॥ यक्षराक्षसगन्धर्वा दिक्पाला दिग्गजादयः ॥ ११ ॥
सनकादिमुनिश्रेष्ठास्त्वमेव रघुनंदन ॥ वसवोऽष्टौ त्रयः काला रुद्रा एकादश स्मृताः
॥ १२ ॥ तारका दश दिक् चैव त्वमेव रघुनंदन ॥ सप्तद्वीपाः समुद्राश्च नगा नद्यस्तथा द्रुमाः
॥ १३ ॥ स्थावरा जंगमाश्चैव त्वमेव रघुनायक ॥ देवतिर्य्यङ्मनुष्याणां दानवानां तथैव
च ॥ १४ ॥ माता पिता तथा भ्राता त्वमेव रघुवल्लभ ॥ सर्वेषां त्वं परं ब्रह्म त्वन्मयं सर्वमेव
हि ॥ १५ ॥ त्वमक्षरं परं ज्योतिस्त्वमेव पुरुषोत्तम ॥ त्वमेव तारकं ब्रह्म त्वत्तोऽन्यन्नैव किं
चन ॥ १६ ॥ शान्तं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनं राजीवलोचनं रामं प्रणमामि
जगत्पतिं ॥ १७ ॥ श्रीवेदव्यास उवाच ॥ ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुङ्गवं ॥ तुष्टो
ऽस्मि मुनिशार्दूल वृणीष्व वरमुत्तमं ॥ १८ ॥ श्रीनारद उवाच ॥ यदि तुष्टोसि सर्वज्ञ

५

श्रीरामकरुणानिधे ॥ त्वन्मूर्तिदर्शनेनैव कृतार्थोहं ममेप्सिते ॥७९॥ धन्योहं कृत
कृत्योहं पुण्योहं पुरुषोत्तम: ॥ अद्य मे सफलं जन्म जीवितं सफलं च मे ॥८०॥ अद्य
मे सफलं ज्ञानं अद्य मे सफलं तपः ॥ अद्य मे सफलो यत्नः त्वत्पादांभोजदर्शनात्
॥८१॥ अद्य मे सफलं सर्वं त्वन्नामस्मरणेन तथा ॥ त्वत्पादांभोरुहद्वंद्व सद्भक्तिं देहि
राघव ॥८२॥ ततः परमसंप्रीतो रामः प्राह स नारदं ॥ श्रीरामचंद्र उवाच ॥ मुनि
वर्य महाभाग मुने त्विष्टं ददामि ते ॥ यत्त्वया वांछितं सर्वं मनसा तद्भविष्यति ॥८३॥
श्रीनारद उवाच ॥ वरं न याचे रघुनाथ युष्मत्पादाब्जभक्तिः सततं ममास्तु ॥ इदं प्रि
यं नाथ वरं प्रयच्छ पुनः पुनस्त्वामिदमेव याचे ॥८४॥ श्रीवेदव्यास उवाच ॥ इत्ये
वमीडितो रामः प्रादात्तस्मै वरांतरं ॥ विरराम महातेजाः सच्चिदानंदविग्रहः
अद्वैतममलं ज्ञानं तन्नामस्मरणं तथा ॥८५॥ अंतर्धानं जगामाथ पुरतस्त

रामस्त
६

6

सुखावहः ॥ ८६ ॥ इति श्रीरघुनाथस्य स्तवराजमनुत्तमं सर्वसौभाग्यसंपत्तिदाय
कं भुक्तिदं शुभं ॥ ८७ ॥ कथितं ब्रह्मपुत्रेण वेदानां सारमुत्तमं गुह्याद्गुह्यतरं दि
व्यं तव स्नेहात्प्रकीर्तितं ॥ ८८ ॥ यः पठेत् शृणुयाद्वापि त्रिसंध्यं श्रद्धयान्वितः ब्रह्म
हत्यादि पापानि तत्समानि बहूनि च ॥ ८९ ॥ स्वर्णस्तेय सुरापान गुरुतल्पायुतानि च
गोवधाद्युपपापानि अनृतात्संभवानि च ॥ सर्वैः प्रमुच्यते पापैः कल्पायुतशतोद्भवैः
९० ॥ मानसं वाचिकं पापं कर्मणा समुपार्जितं ॥ श्रीरामस्मरणेनैव तत्क्षणान्नश्य
ति ध्रुवं ॥ ९१ ॥ इदं सत्यमिदं सत्यं सत्यमेतदिहोच्यते ॥ रामः सत्यं परं ब्रह्म रामा
त्किंचिन्न विद्यते ॥ ९२ ॥ तस्माद्रामस्वरूपं हि सत्यं सत्यमिदं जगत ॥ ९३ ॥ श्रीसूत
उवाच ॥ श्रीरामचंद्र रघुपुंगव राजवर्य राजेंद्र राम रघुनायक राघवेश ॥ राजाधि
राज रघुनंदन रामभद्र दासोहमद्य भवतः शरणागतोस्मि ॥ ९४ ॥ वैदेहीसहितं सु
रद्रुम

री

रघूत्तम त्वं लेहि मम हृत्पद्ममध्ये पुष्पकमासने मस्मिन्मये वीरासने संस्थितं ॥ अग्रे वाच

यति पुत्रे जनस्तेन नत्वेचु सद्भिः ॥ परं व्याख्यातभरतादिभिः परिवृतं तेनाम मे भजे श्याम

लं ॥ ९४ ॥ रामं रत्नकिरीटकुंडलयुतं केयूरहारान्वितं ॥ सीतालंकृतवामभागमम

लं सिंहासनस्थं विभुं सुग्रीवादिहरीश्वरैः सुरगणैः संसेव्यमानं सदा ॥ विश्वामित्रपरा

शरादिमुनिभिः संस्तूयमानं प्रभुं ९५ सकलगुणनिधानं योगिभिः स्तूयमानं

भुजविजितविमानं राक्षसेंद्रादिमानं ॥ महितनृपभयानं सीतया शोभमानं स्मर

त हृदय विमानं ब्रह्म रामाभिधानं ॥ ९६ ॥ रघुवर तव मूर्तिर्मामके मानसाब्जे नरक

गतिहरं ते नामधेयं मुखे मे ॥ अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जे भवजलनि

धिमग्नं रक्ष मामार्तबंधो ॥ ९७ ॥ रामं रत्नमहद्वेदं चित्रकूटपतिं हरिं कौशल्याशु

क्तिसंभूतं जानकीकंठभूषणं ॥ १०० ॥ इति श्रीसनत्कुमारसंहितायां नारद १

रामग
१५

मोतीश्रीराम लिखवजा राजसे सर्ते समत १८६२ श्रीरामा

७२

७